# saptarShirAmAyaNam

# સપ્તર્ષિરામાયણમ્

## Document Information

Text title : saptarShirAmAyaNa by

File name : saptarShirAmAyaNa.itx

Category : raama

Location : doc_raama

Proofread by : Sunder Hattangadi

Description/comments : Hanumana who propitiated Saptarshis to narrate the Ramayana

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

saptarShirAmAyaNam

# સપ્તર્ષિરામાયણમ્

કાશ્યપોઽત્રિર્ભરદ્વાજો વિશ્વામિત્રોઽથ ગૌતમઃ ।
જમદગ્નિર્વસિષ્ઠશ્ચ સપ્તૈતે મુનિપુઙ્ગવાઃ ॥

કાશ્યપઃ - બાલકાણ્ડમ્

જાતઃ શ્રી રઘુનાયકો દશરથાન્મુન્યાશ્રયસ્તાટકાં
હ્ત્વા રક્ષિતકૌશિકક્રતુવરઃ કૃત્વાપ્યહલ્યાં શુભામ્ ।
ભઙ્ક્ત્વા રુદ્રશરાસનં જનકજાં પાણૌ ગૃહીત્વા તતો
જિત્વાર્દ્ધાધ્વનિ ભાર્ગવં પુનરગાત્સીતાસમેતઃ પુરીમ્ ॥

અત્રિઃ - અયોધ્યાકાણ્ડમ્

દાસ્યા મન્થરયા દયારહિતયા દુર્ભેદિતા કૈકયી
શ્રીરામપ્રથમાભિષેકસમયે માતાપ્યયાચદ્વરૌ ।
ભર્તારં ભરતઃ પ્રશાસ્તુ ધરણીં રામો વનં ગચ્છતા-
દિત્યાકર્ણ્ય સચોત્તરં નહિ દદૌ દુઃખેન મૂર્ચ્છાં ગતઃ ॥

ભરદ્વાજઃ - આરણ્યકાણ્ડમ્

શ્રીરામઃ પિતૃશાસનાદ્વનમગાત્ સૌમિત્રિસીતાન્વિતો
ગંગાં પ્રાપ્ય જટાં નિબધ્ય સગુહઃ સચ્ચિત્રકૂટે વસન્ ।
કૃત્વા તત્ર પિતૃક્રિયાં સભરતો દત્વાઽભયં દણ્ડકે
પ્રાપ્યાગસ્ત્યમુનીશ્વરં તદુદિતં ધૃત્વા ધનુશ્ચાક્ષયમ્ ॥

વિશ્વામિત્રઃ - કિષ્કિન્ધાકાણ્ડમ્

ગત્વા પઞ્ચવટીમગસ્ત્યવચનાદ્દત્વાઽભયં મૌનિનાં
છિત્વા શૂર્પણખાસ્યકર્ણયુગલં ત્રાતું સમસ્તાન્ મુનીન્ ।
હત્વા તં ચ ખરં સુવર્ણહરિણં ભિત્વા તથા વાલિનં
તારારત્ન મવૈરિરાજ્યમકરોત્સર્વં ચ સુગ્રીવસાત્ ॥

ગૌતમઃ - સુન્દરકાણ્ડમ્

દૂતો દાશરથેઃ સલીલમુદધીં તીર્ત્વા હનૂમાન્ મહાન્

દૃષ્ટ્વાઽશોકવને સ્થિતાં જનકજાં દત્વાંગુલેર્મુદ્રિકામ્ ।
અક્ષાદીનસુરાન્નિહત્ય મહતીં લઙ્કાં ચ દગ્ધ્વા પુનઃ
શ્રીરામં ચ સમેત્ય દેવ જનની દૃષ્ટા મયેત્યબ્રવીત્ ॥

જમદગ્નિઃ - યુદ્ધકાણ્ડમ્

રામો બદ્ધપયોનિધિઃ કપિવરૈર્વીરૈર્નલાદ્યૈર્વૃતો
લઙ્કાં પ્રાપ્ય સકુંભકર્ણતનુજં હત્વા રણે રાવણમ્ ।
ત્સયામ્ ન્યસ્ય વિભીષણં પુનરસૌ સીતાપતિઃ પુષ્પકા-
રૂઢઃ સન્ પુરમાગતઃ સભરતઃ સિંહાસનસ્થો બભૌ ॥

વસિષ્ઠઃ - ઉત્તરકાણ્ડમ્

હેમસ્તમ્ભસહસ્રષોડશમહાસૌધાન્તરાગ્રે લસ-
દ્વેદિસ્થં નવરત્નકીલિતમહાસિંહાસને સીતયા ।
શત્રુઘ્નેન ચ લક્ષ્મણેન ભરતેનારાધિતં રાઘવં
વિશ્વામિત્રવસિષ્ઠપૂર્વમુનિભિઃ પટ્ટાભિષિક્તં ભજે ॥

શ્રી રામો હયમેધમુખ્યમખકૃત્ સમ્યક્ પ્રજાઃ પાલયન્
કૃત્વા રાજ્યમથાનુજશ્ચ સુચિરં ભૂરિસ્વધર્માન્વિતૌ ।
પુત્રૌ ભ્રાતૃસમન્વિતૌ કુશલવૌ સંસ્થાપ્ય ભૂમણ્ડલે
સોઽયોધ્યાપુરવાસિભિશ્ચ સરયૂસ્નાતઃ પ્રપેદે દિવમ્ ॥

સર્વે ઋષયઃ -

શ્રીરામસ્ય કથાસુધાતિમધુરાન્ શ્લોકાનિમાનુત્તમાન્
યે શ્ૃણ્વન્તિ પઠન્તિ ચ પ્રતિદિનં તેઽઘૌઘવિધ્વંસિનઃ ।
શ્રીમન્તો બહુપુત્રપૌત્રસહિતા ભુક્ત્વેહ ભોગાશ્ચિરં
ભોગાન્તે તુ સદાર્ચિતં સુરગણૈર્વિષ્ણોર્લ્લભન્તે પદમ્ ॥

॥ ઇતિ શ્રીસપ્તર્ષિરામાયણં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

*saptarShirAmAyaNam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*